# सुन्दरकाण्ड त्रिंशः सर्गः (३०) - सीता समाश्वासण निर्धारणम्

हनुमानपि विश्रान्तः सर्वं शुश्राव तत्त्वतः ।
सीतायास् त्रिजटायाश्च राक्षसीनां च तर्जनम् ॥ १ ॥

अवेक्षमाणस्तां देवीं देवतामिव नन्दने ।
ततो बहुविधां चिन्तां चिन्तयामास वानरः ॥ २ ॥

यां कपीनां सहस्राणि सुबहून् ययुतानि च ।
दिक्षु सर्वासु मार्गन्ते सेयमासादिता मया ॥ ३ ॥

चारेण तु सुयुक्तेन शत्रोः शक्ति मवेक्षता ।
गूढेन चरता ताव दवेक्षित मिदं मया ॥ ४ ॥

राक्षसानां विशेषश्च पुरी चेय मवेक्षिता ।
राक्षसाधिपते रस्य प्रभावो रावणस्य च ॥ ५ ॥

युक्तं तस्या प्रमेयस्य सर्व सत्त्व दयावतः ।
समाश्वासयितुं भार्यां पति दर्शन काङ्क्षिणीम् ॥ ६ ॥

अहमाश्वासयाम् येनां पूर्णचन्द्र निभाननाम् ।
अदृष्ट दुःखां दुःखार्तां दुःखस्यान्त मगच्छतीम् ॥ ७ ॥

यद्यप्यह मिमां देवीं शोकोप हत चेतनाम् ।
अनाश्वास्य गमिष्यामि दोषवद् गमनं भवेत् ॥ ८ ॥

गते हि मयि तत्रेयं राजपुत्री यशस्विनी ।
परित्राण मविन्दन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥

मया च स महाबाहुः पूर्णचन्द्र निभाननः ।
समाश्वासयितुं न्याय्यः सीता दर्शन लालसः ॥ १० ॥

निशाचरीणां प्रत्यक्ष मनर्हं चापि भाषणम् ।
कथं नु खलु कर्तव्य मिदं कृच्छ्र गतो ह्यहम् ॥ ११ ॥

अनेन रात्रि शेषेण यदि नाश्वास्यते मया ।
सर्वथा नास्ति सन्देहः परित्यक्ष्यति जीवितम् ॥ १२ ॥

रामश्च यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः ।
किमहं तं प्रतिब्रूया मसम्भाष्य सुमध्यमाम् ॥ १३ ॥

सीता सन्देश रहितं मामितस् त्वरया गतम् ।
निर्दहेदपि काकुत्स्थः क्रुद्धस् तीव्रेण चक्षुषा ॥ १४ ॥

यदि चोद्यो जयिष्यामि भर्तारं राम कारणात् ।
व्यर्थ मागमनं तस्य ससैन्यस्य भविष्यति ॥ १५ ॥

अन्तरं त्वहमासाद्य राक्षसीना मिह स्थितः ।
शनै राश्वासयिष्यामि सन्ताप बहुला मिमाम् ॥ १६ ॥

अहं त्वति तनुश्चैव वानरश्च विशेषतः ।
वाचं चोदाहरिष्यामि मानुषी मिह संस्कृताम् ॥ १७ ॥

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥ १८ ॥

वानरस्य विशेषेण कथं स्यादभि भाषणम् ।
अवश्यमेव वक्तव्यं मानुषं वाक्य मर्थवत् ॥ १९ ॥

मया सान्त्वयितुं शक्या नान्यथेय मनिन्दिता ।
सेय मालोक्य मे रूपं जानकी भाषितं तथा ॥ २० ॥

रक्षोभिस् त्रासिता पूर्वं भूयस्त्रासं गमिष्यति ।
ततो जात परित्रासा शब्दं कुर्यान् मनस्विनी ॥ २१ ॥

जानमाना विशालाक्षी रावणं काम रूपिणम् ।
सीतया च कृते शब्दे सहसा राक्षसी गणः ॥ २२ ॥

नाना प्रहरणो घोरः समेया दन्तकोपमः ।
ततो मां सम्परिक्षिप्य सर्वतो विकृताननाः ॥ २३ ॥

वधे च ग्रहणे चैव कुर्युर्यत्नं यथा बलम् ।
गृह्य शाखाः प्रशाखाश्च स्कन्धांश् छोत्तमशाखिनाम् ॥ २४ ॥

दृष्ट्वा विपरिधावन्तं भवेयुर् भय शङ्किताः ।
मम रूपं च सम्प्रेक्ष्य वने विचरतो महत् ॥ २५ ॥

राक्षस्यो भय वित्रस्ता भवेयुर् विकृताननाः ।
ततः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि ॥ २६ ॥

राक्षसेन्द्र नियुक्तानां राक्षसेन्द्र निवेशने ।
ते शूल शक्ति निस्त्रिंश विविधायुध पाणयः ॥ २७ ॥

आपतेयुर् विमर्देऽस्मिन् वेगेनोद् विग्न कारिणः ।
संरुद्धस् तैस्तु परितो विधमन् रक्षसां बलम् ॥ २८ ॥

शक्नुयां न तु सम्प्राप्तुं परं पारं महोदधेः ।
मां वा गृह्णीयुराप्लुत्य बहवः शीघ्रकारिणः ॥ २९ ॥

स्यादियं चागृहीतार्था मम च ग्रहणं भवेत् ।
हिंसाभि रुचयो हिंस्यु रिमां वा जनकात्मजाम् ॥ ३० ॥

विपन्नं स्यात्ततः कार्यं रामसुग्रीवयो रिदम् ।
उद्देशे नष्टमार्गेऽस्मिन् राक्षसैः परिवारिते ॥ ३१ ॥

सागरेण परिक्षिप्ते गुप्ते वसति जानकी ।
विशस्ते वा गृहीते वा रक्षोभिर् मयि सम्युगे ॥ ३२ ॥

नान्यं पश्यामि रामस्य साहाय्यं कार्य साधने ।
विमृशंश्च न पश्यामि यो हते मयि वानरः ॥ ३३ ॥

शत योजन विस्तीर्णं लङ्घयेत महोदधिम् ।
कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि रक्षसाम् ॥ ३४ ॥

न तु शक्ष्यामि सम्प्राप्तुं परं पारं महोदधेः ।
असत्यानि च युद्धानि संशयो मे न रोचते ॥ ३५ ॥

कश्च निःसंशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ।
प्राण त्यागश्च वैदेह्या भवेदनभि भाषणे ॥ ३६ ॥

एष दोषो महान्हि स्यान् मम सीताभि भाषणे ।
भूताश् चार्था विनश्यन्ति देशकाल विरोधिताः ॥ ३७ ॥

विक्लबं दूतमासाद्य तमः सूर्योदये यथा ।
अर्था नर्थान्तरे बुद्धिर् निश्चिताऽपि न शोभते ॥ ३८ ॥

घातयन्ति हि कार्याणि दूताः पण्डित मानिनः ।
न विनश्येत् कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ ३९ ॥

लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ।
कथं नु खलु वाक्यं मे शृणुयान् नोद्विजेत वा ॥ ४० ॥

इति सञ्चिन्त्य हनुमांश् चकार मतिमान् मतिम् ।
राम मक्लिष्ट कर्माणं स्वबन्धु मनुकीर्तयन् ॥ ४१ ॥

नैना मुद्वेज यिष्यामि तद्बन्धु गत मानसाम् ।
इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः ॥ ४२ ॥

शुभानि धर्म युक्तानि वचनानि समर्पयन् ।
श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन् गिरम् ।
श्रद्धास्यति यथा हीयं तथा सर्वं समादधे ॥ ४३ ॥

इति स बहुविधं महानुभावो
जगतिपतेः प्रमदा मवेक्षमाणः ।
मधुर मवितथं जगाद वाक्यं
द्रुम विटपान्तर मास्थितो हनूमान् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिंशः सर्गः ॥ ३० ॥